॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

प्रथमकाण्डे द्वितीयः प्रश्नः

अग्निष्टोमे क्रयः

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

आप॑ उन्दन्तु जी॒वसे॑ दीर्घायु॒त्वाय॒ वर्च॑स॒ ओष॑धे॒ त्राय॑स्वैन॒ꣳ॒ स्वधि॑ते॒ मैन॑ꣳ हिꣳसीर् दे॒व-
श्रू॒रेता॒नि॒ प्र व॑पे स्व॒स्त्युत्त॑राण्यशी॒यापो॑ अ॒स्मान् मा॒तर॑ः शुन्धन्तु घृ॒तेन॑ नो घृत॒पुव॑ः पुनन्तु॒
विश्व॑म॒स्मत् प्र व॑हन्तु रि॒प्रमुदा᳚भ्य॒ः शुचि॒रा पू॒त ए॑मि॒ सोम॑स्य त॒नूर॑सि त॒नुव॑म्मे पाहि मही॒ना-
म्पयो॑ऽसि वर्चो॒धा अ॑सि॒ वर्चो॒ ॥ [१] ॥ मयि॑ धेहि वृ॒त्रस्य॑ क॒नीनि॑काऽसि॒ चख्षु॒ष्पा अ॑सि॒
चख्षु॑र्मे पाहि चि॒त्पति॑स्त्वा पुनातु वा॒क्पति॑स्त्वा पुनातु दे॒वस्त्वा॑ सवि॒ता पु॑ना॒त्वच्छि॑द्रेण प॒वित्रे॑ण॒
वसो॒ः सूर्य॑स्य र॒श्मिभि॒स्तस्य॑ ते पवित्रपते प॒वित्रे॑ण॒ यस्मै॒ कम्पु॒ने तच्छ॑के॒यमा वो॑ देवास ईमहे॒
सत्य॑धर्माणो अद्ध्व॒रे यद्वो॑ देवास आगु॒रे यज्ञि॑यासो॒ हवा॑मह॒ इन्द्रा᳚ग्नी॒ द्यावा॑पृथिवी॒ आप॑ ओषधी॒
स्त्वन्दी॒ख्षाणा॒मधि॑पतिरसी॒ह मा॒ सन्त॑म्पाहि ॥ [२] ॥

(वर्च॑ ओषधी र॒ष्टौ च॑) ॥ १ ॥

आकू᳚त्यै प्र॒युजे॒ऽग्नये॒ स्वाहा॑ मे॒धायै॒ मन॑से॒ऽग्नये॒ स्वाहा॑ दी॒ख्षायै॒ तप॑से॒ऽग्नये॒ स्वाहा॒ सर॑स्वत्यै
पू॒ष्णे᳚ऽग्नये॒ स्वाहाऽऽपो॑ देवीर् बृहतीर् विश्वशंभुवो॒ द्यावा॑पृथि॒वी उ॒र्व॑न्तरि॑ख्षं॒ बृह॒स्पति॑र्नो ह॒विषा॑
वृधातु॒ स्वाहा॒ विश्वे॑ दे॒वस्य॑ ने॒तुर्मर्तो᳚ वृणीत स॒ख्यँव्विश्वे॑ रा॒य इ॑षुद्ध्यसि द्यु॒म्नँव्वृ॑णीत पु॒ष्यसे॒
स्वाह॑र्ख्सा॒मयो॒ः शिल्पे᳚ स्थ॒स्ते वा॒मा र॑भे॒ ते मा॑ ॥ [३] ॥ पात॒मास्य य॒ज्ञस्यो॒दृच॑ इ॒मान्धिय॒ꣳ॒
शिख्ष॑माणस्य देव॒ क्रतु॒न्दख्ष॑ँव्वरु॒ण सꣳ शि॑शाधि॒ ययाऽति॒ विश्वा॑ दु॒रिता तरे॑म सु॒तर्मा॑ण॒मधि॒

नावꣳ रुहेमोर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जम्मे यच्छ पाहि मा मा मा हिꣳसीर् विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ नक्षत्राणाम्माऽतीकाशात् पाहीन्द्रस्य योनिरसि ॥ [४] ॥ मा मा हिꣳसीः कृष्यै त्वा सुसस्यायै सुपिप्पलाभ्यस्त्वौषधीभ्यः सूपस्था देवो वनस्पतिरूर्ध्वो मा पाह्योदृचः स्वाहा यज्ञम्मनसा स्वाहा द्यावापृथिवीभ्याꣳ स्वाहोरो रन्तरिक्षाथ् स्वाहा यज्ञँव्वातादा रभे ॥ [५] ॥

(मा योनिरसि त्रिꣳशच्च) ॥ २ ॥

दैवीन्धियम्मनामहे सुमृडीकामभिष्टये वर्चोधाय्यँयज्ञवाहसꣳ सुपारा नो असद् वशे। ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहाऽग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः। त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्व ॥ [६] ॥ यँयज्ञेष्वीड्यः॥ विश्वे देवा अभि मामाऽववृत्रन् पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदावा रास्वेयथ् सोमाऽऽ*भूयो भर मा पृणन् पूर्त्या वि राधि माऽहमायुषा चन्द्रमसि मम भोगाय भव वस्त्रमसि मम भोगाय भवोस्राऽसि मम भोगाय भव हयोऽसि मम भोगाय भव ॥ [७] ॥ छागोऽसि मम भोगाय भव मेषोऽसि मम भोगाय भव वायवे त्वा वरुणाय त्वा निर्ऋत्यै त्वा रुद्राय त्वा देवीरापो अपान्नपाद्य ऊर्मिर्हविष्य इन्द्रियावान् मदिन्तमस्तँव्वो माऽव क्रमिषमच्छिन्नन्तन्तुम्पृथिव्या अनु गेषम्भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरेता ते अस्त्वथेमव स्य वर आ पृथिव्या आरे शत्रून् कृणुहि सर्ववीर एदमगन्म देवयजनम्पृथिव्या विश्वे देवा यदजुषन्त पूर्व ऋक्सामाभ्याय्यँजुषा सन्तरन्तो रायस्पोषेण समिषा मदेम ॥ [८] ॥

(आ त्वꣳहयोऽसि मम भोगाय भवस्यपञ्चविꣳशतिश्च) ॥ ३ ॥

इयन्ते शुक्र तनूरिदँव्वर्चस्तया सम्भव भ्राजङ्गच्छ जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहा शुक्रमस्यमृतमसि वैश्वदेवꣳ हविः सूर्यस्य चक्षुरा

ऽरुहमग्ने रख्ष्णः कनीनिकाय्ँयदेतशेभिरीयसे भ्राजमानो विपश्चिता चिदसि मनाऽसि धीरसि दख्षिणा ॥ [९] ॥ ऽसि यज्ञियाऽसि ख्षत्रियाऽस्यदितिरस्युभयतश्शीर्ष्णी सा नः सुप्राची सुप्रतीची सं भव मित्रस्त्वा पदि बद्ध्नातु पूषाऽद्ध्वनः पात्विन्द्रायाद्ध्यख्षायानु त्वा माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूँथ्यः सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्र-स्त्वाऽऽ*वर्तयतु मित्रस्य पथा स्वस्ति सोमसखा पुनरेहि सह रय्या ॥ [१०] ॥

(दख्षिणासोमसखापञ्च च) ॥ ४ ॥

वस्व्यसि रुद्राऽस्यदितिरस्यादित्याऽसि शुक्राऽसि चन्द्राऽसि बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिरा चिकेतु पृथिव्यास्त्वा मूर्द्धन्ना जिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा परिलि-खितꣳ रख्षः परिलिखिता अरातय इदमहꣳ रख्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इदमस्य ग्रीवा ॥ [११] ॥ अपि कृन्ताम्यस्मे रायस्त्वे रायस्तोते रायः सन्देवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरव्विँदेय तव सन्दृशि माऽहꣳरा-यस्पोषेण वि योषम् ॥ [१२] ॥

(अस्य ग्रीवाएकान्न त्रिꣳशच्च) ॥ ५ ॥

अꣳशुना ते अꣳशुः पृच्यताम्परुषा परुर् गन्धस्ते काममवतु मदाय रसो अच्युतोऽमा-त्योऽसि शुक्रस्ते ग्रहोऽभि त्यन्देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभि प्रियं मतिमूद्ध्वा यस्यामतिर्भा अदिद्युतथ्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा सुवः। प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनु प्राणिहि प्रजास्त्वामनु प्राणन्तु ॥ [१३] ॥

(अनुसप्त च) ॥ ६ ॥

सोमन्ते क्रीणाम्यूर्जस्वन्तम्पयस्वन्तव्वीँर्यावन्तमभिमातिषाहꣳ शुक्रन्ते शुक्रेण क्रीणामि चन्द्रञ्चन्द्रेणामृतममृतेन सम्यत्ते गोरस्मे चन्द्राणि तपसस्तनूरसि प्रजापतेर् वर्णस्तस्यास्ते सह-

स्त्रपो॒षम्पुष्य॑न्त्याश्वर॒मेण॑ प॒शुना᳚ क्रीणाम्य॒स्मे ते॒ बन्धु॒र्मयि॑ ते॒ राय॑ः श्रयन्ताम॒स्मे ज्योति॑ः सोम-
विक्र॒यिणि॒ तमो॑ मि॒त्रो न॒ एहि॒ सुमि॑त्र॒धा॒ इन्द्र॑स्यो॒रु मा वि॑श॒ दक्षि॑ण मु॒शन्नु॒शन्त॑ꣳ स्यो॒नः
स्यो॒नꣳ॒ स्वान॒ भ्राजाङ्घा॑रे॒ बंभा॑रे॒ हस्त॒ सुह॑स्त॒ कृशा॑नवे॒ते व॑ः सोम॒ क्रय॑णा॒स्तान् र॑क्षद्॒ध्व॒म्मा वो॑
दभन् ॥ [१४] ॥

(उ॒रुंद्वावि॑ꣳशतिश्च) ॥ ७ ॥

उदायु॑षा स्वा॒युषोदोष॑धीना॒ꣳ॒ रसे॒नोत् प॒र्जन्य॑स्य॒ शुष्मे॒णोद॑स्थाम॒मृता॒ꣳ॒ अनु॑। उ॒र्व॑न्तरि॑क्ष॒-
मन्वि॒ह्यदि॑त्या॒ः सदो॒ऽस्यदि॑त्या॒ः सद॒ आ सी॒दास्त॑भ्ना॒द्द्यामृ॑ष॒भो अ॒न्तरि॑क्ष॒ममि॑मीत वरि॒माण॑-
म्पृथि॒व्या आऽसी॑द॒द् विश्वा॒ भुव॑नानि स॒म्राड् विश्वेत्तानि॒ वरु॑णस्य व्र॒तानि॒ वने॑षु॒ व्य॑न्तरि॑क्षन्त-
तान॒ वा॒जमर्व॑थ्सु॒ पयो॑ अघ्नि॒यासु॑ हृ॒थ्सु ॥ [१५] ॥ क्रतु॒व्ँव॑रुणो वि॒क्ष्व॑ग्निन्दि॒वि सूर्य॑मदधा॒थ्
सोम॒मद्रा॒वुदु॒त्यञ्जा॒तवे॑दस॒न्दे॒वव्ँव॑हन्ति के॒तव॑ः। दृ॒शे विश्वा॑य॒ सूर्य᳚म्॥ उस्रा॒वेत॑न्धूर्षाहा॒वन॒श्रू
अवी॑रहणौ ब्रह्म॒चोद॑नौ॒ वरु॑णस्य॒ स्कंभ॑नमसि॒ वरु॑णस्य स्कंभ॒सर्ज॑नमसि॒ प्रत्य॑स्तो॒ वरु॑णस्य॒
पाश॑ः ॥ [१६] ॥

(हृ॒थ्सुपञ्च॑त्रिꣳशाच्च) ॥ ८ ॥

प्र च्य॑वस्व भुवस्पते॒ विश्वा᳚न्य॒भि धामा॑नि॒ मा त्वा॑ परि॒परी॑ विद॒न्मा त्वा॑ परि॒पन्थिनो॑ विद॒न्मा
त्वा॒ वृका॑ अघा॒यवो॒ मा ग॑न्ध॒र्वो॑ वि॒श्वाव॑सु॒रा द॑घच्छ्ये॒नो भू॒त्वा परा॑ प॒त यज॑मानस्य नो गृ॒हे
दे॒वैः स॑ꣳ॒स्कृ॒तय्ँय॑जमानस्य स्व॒स्त्यय॑न्य॒स्यपि॒ पन्था॑मगस्महि स्वस्ति॒गाम॑ने॒हस॒य्ँयेन॒ विश्वा॒ः परि॒
द्विषो॑ वृ॒णक्ति॒ वि॒न्दते॒ वसु॒ नमो॑ मि॒त्रस्य॒ वरु॑णस्य॒ चक्ष॑से म॒हो दे॒वाय॒ तदृ॒तꣳ स॑पर्यत दू॒रे॒दृशे॑
दे॒वजा॑ताय के॒तवे॑ दि॒वस्पु॒त्राय॒ सूर्या॑य शꣳसत॒ वरु॑णस्य॒ स्कंभ॑नमसि॒ वरु॑णस्य स्कंभ॒सर्ज॑नम॒-
स्युन्मु॑क्तो॒ वरु॑णस्य॒ पाश॑ः ॥ [१७] ॥

(मि॒त्रस्य॒त्रयो॑विꣳशतिश्च) ॥ ९ ॥

अग्नेरातिथ्यमसि विष्णवे त्वा सोमस्याऽऽ*तिथ्यमसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वाऽग्नये त्वा रायस्पोषदाव्न्ने विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यानदित्याः सदोऽस्यदित्याः सद आ ॥ [१८] ॥ सीद वरुणोऽसि धृतव्रतो वारुणमसि शय्योर् देवानाꣳ सख्यान्मा देवानामपसश्छिथ्स्मह्यापतये त्वा गृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि शाक्कराय त्वा गृह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णाम्यनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिषस्तिपा अनभिशस्तेऽन्यमनु मे दीक्षान्दीक्षापतिर् मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुप गेषꣳ सुविते मा धाः ॥ [१९] ॥

(आमैकञ्च) ॥ १० ॥

अꣳशुरꣳशुस्ते देव सोमाऽऽ*प्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाऽऽ*प्यायय सखीन्थ् सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या अग्ने व्रतपते त्वँव्रतानाँव्रतपतिरसि या मम तनूरेषा सा त्वयि ॥ [२०] ॥ या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर् व्रतानि या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोऽग्रँवचो अपावधीन्त्वेषँवचो अपावधीꣳ स्वाहा ॥ [२१] ॥

(त्वयिचत्वारिꣳशच्च) ॥ ११ ॥

वित्तायनी मेऽसि तिक्तायनी मेऽस्यवतान्मा नाथितमवतान्मा व्यथितँविदेरग्निर्नभो नामाग्ने अङ्गिरो योऽस्याम्पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टन्नाम यज्ञियन्तेन त्वाऽऽ*दधेऽग्ने अङ्गिरो यो द्वितीयस्यान्तृतीयस्याम्पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टन्नाम ॥ [२२] ॥ यज्ञियन्तेन त्वाऽऽ*दधे सिꣳहीरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतान्ध्रुवाऽसि देवेभ्यः शुन्धस्व देवेभ्यः शुंभस्वेन्द्रघोषस्त्वा वसुभिः पुरस्तात् पातु मनोजवास्त्वा पितृभिर्

दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात् पातु विश्वकर्मा त्वाऽऽदित्यैरुत्तरतः पातु सिꣳहीरसि सपत्नसाही स्वाहा सिꣳहीरसि सुप्रजावनिः स्वाहा सिꣳही ॥ [२३] ॥ रसि रायस्पोषवनिः स्वाहा सिꣳहीरस्यादित्यवनिः स्वाहा सिꣳहीरस्या वह देवान्देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीन्दृꣳह ध्रुवक्षिदस्यन्तरिक्षन्दृꣳहाच्युतक्षिदसि दिवन्दृꣳहाग्नेर् भस्मास्यग्नेः पुरीषमसि ॥ [२४] ॥

(नामसुप्रजावनिः स्वाहा सिꣳहीःपञ्चत्रिꣳशच्च) ॥ १२ ॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥ सुवाग्देव दुर्याꣳ आ वद देवश्रुतौ देवेष्वा घोषेथामा नो वीरो जायताङ्कर्मण्यो यꣳ सर्वेऽनु जीवाम यो बहूनामसद्वशी॥ इदव्विष्णुर् विचक्रमे त्रेधा नि दधे पदम्॥ समूढमस्य ॥ [२५] ॥ पाꣳसुर इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये। व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः॥ प्राची प्रेतमद्ध्वरङ्कल्पयन्ती ऊर्द्ध्वय्यँज्ञन्नयतम्मा जीह्वरतमत्र रमेथाव्वँर्ष्मन् पृथिव्या दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर् वसव्यैरा प्र यच्छ ॥ [२६] ॥ दक्षिणादोत सव्यात्। विष्णोर्नुकव्वीँर्याणि प्र वोचय्यँः पार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳ सधस्थव्विँचक्रमाण स्त्रेधोरुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर् ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ [२७] ॥

(अस्ययच्छैकान्न चत्वारिꣳशच्च) ॥ १३ ॥

कृणुष्व पाजः प्रसितिन्न पृथ्वीय्याँहि राजेवामवाꣳ इभेन। तृष्वीमनु प्रसितिन्द्रूणानोऽस्ताऽसि विद्ध्य रक्षस स्तपिष्ठैः॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः। तपूꣳष्यग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्वगुल्काः॥ प्रतिस्पशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरे अघशꣳसो ॥ [२८] ॥ यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत्॥ उदग्ने

तिष्ठ प्रत्या *ऽऽतनुष्व न्यमित्रा॑ꣳ ओषतात् तिग्महेते। यो नो अरातिꣳ समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्कम्॥ ऊद्ध्वो भव प्रतिविद्ध्याऽद्ध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अवस्थिरा तनुहि यातुजूनाञ्जामिमजामिं प्रमृणीहि शत्रून्॥ स ते ॥ [२९] ॥ जानाति सुमतिय्यँविष्ठय ईवते ब्रह्मणे गातुमैरत्। विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभि द्यौत्॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषाय उक्थैः। पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना साऽसदिष्टिः॥ अर्चामि ते सुमतिङ्घोष्यर्वाख्सन्ते वा वा ता जरता ॥ [३०] ॥ मियंगीः। स्वश्वास्त्वा सुरथा मर्जयेमास्मे ख्षत्राणि धारयेरनु द्यून्॥ इह त्वा भूर्या चरे दुपत्मन् दोषावस्तर् दीदिवाꣳसमनु द्यून्। क्रीडन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवाꣳसो जनानाम्॥ यस्त्वा-स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन। तस्य त्राताभवसि तस्य सखा यस्त आतिथ्य-मानुषग् जुजोषत्॥ महो रुजामि ॥ [३१] ॥ बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय। त्वन्नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः॥ अस्वप्नज स्तरणयः सुशेवा अतन्द्रा-सोऽवृका अश्रमिष्ठाः। ते पायवः सद्ध्रियञ्चो निषद्याऽग्ने तवनः पान्त्वमूर॥ ये पायवो मामते-यन्ते अग्ने पश्यन्तो अन्धन्दुरितादरख्षन्न्। ररख्षतान्थ् सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो ना ह ॥ [३२] ॥ देभुः॥ त्वया वयꣳ सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान्। उभा शꣳसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण॥ अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ शस्यमान-ङ्गृभाय। दहाशसो रख्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्॥ रख्षोहणव्वाँजिनमा-जिघर्मि मित्रम्प्रथिष्ठमुपयामि शर्म। शिशानो अग्निः क्रतुभिः समिद्धःसनो दिवा ॥ [३३] ॥ सरिषः पातुनक्तम्॥ विज्योतिषा बृहता भात्यग्निराविर् विश्वानि कृणुते महित्वा। प्रादेवीर् मायाः सहतेदुरेवाः शिशीते श्रृङ्गे रख्षसे विनिख्षे॥ उत स्वानासो दिविषन्त्वग्ने स्तिग्मायुधा रख्षसे हन्तवा उ। मदे चिदस्य प्ररुजन्ति भामा न वरन्ते परिबाधो अदेवीः ॥ [३४] ॥

(अघशꣳसःस तेजरताꣳरुजामिह दिवै कचत्वारिꣳशच्च) ॥ १४ ॥

समाप्ति कोवैः

(आप॑ उन्द॒न्त्वाकू᳚त्यै॒दै॒वीं॑मि॒यन्ते॒वस्व्य॑स्य॒ꣳ॒शुना॑ते॒सोम॑न्त॒उदायु॑षा॒ प्र च्य॑वस्वा॒ ग्नेरा॑ति॒थ्य म॒ꣳ॒शुर॑ꣳ शु॒र्वि॒त्ताय॑नी मेऽसि
यु॒ञ्जते॑कृणु॒ष्व पाज॒श्चतु॑र्दश।)

(आपो॒वस्व्य॑सि॒ या तवे॒यज्ञीश्चतु॑स्त्रिꣳशत्)

(आप॑ उन्द॒न्त्वदे॑वीः)

॥ हरिः ॐ ॥

प्रथमकाण्डे द्वितीयः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१४	३४

ॐ